शैलेयं, क्ली, (शिलायां भवम् । शिला+ढक् ।) शैलजाख्यगन्धद्रव्यम् । शैलेयक इति रन्दूच इति छरिला इति च ख्यातम् । तत्पर्य्यायो यथा,—
"शैलेयं शैलजं हृद्यं शिलापुष्पं शिलोद्भवम् ।
स्थविरं पलितं जीर्णं तथा कालानुसार्य्यकम् ॥
शिलोत्थञ्च शिलादद्रुः शैलाजं गिरिपुष्पकम् ।
शिलाप्रसूनं सुभगं शैलकं षोडशाह्वयम् ॥"
अस्य गुणाः ।
"शैलेयं शिशिरं तिक्तं सुगन्धि कफपित्तजित् ।
दाहतृष्णावमिश्वासव्रणदोषविनाशनम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"शैलेयन्तु शिलापुष्पं हृद्यं कालानुसार्य्यकम् ।
शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डूकुष्ठाश्मरीदाहविषहृद्गुदरास्रहृत् ॥"
इति भावप्रकाशः ॥*॥
तालपर्णी । सैन्धवम् । इति मेदिनी ॥
शैलेयं, त्रि, (शैले भवम् । शैल+ढक् ।) शैलसम्भवम् । इति हेमचन्द्रः ॥ शिलातुल्यम् । इति शब्दरत्नावली ॥ (शिलेव । शिला+"शिलाया ढः ।" ५ । ३ । १०२ । इति योगविभागेन ढञ् ॥)
शैलेयः, पुं, (शैले भवः । शैल+ढक् ।) सिंहः । भ्रमरः । इति शब्दरत्नावली ॥
शैलेयी, स्त्री, (शैले भवा । शैल+ढक् । ङीष् ।) पार्व्वती । इति त्रिकाण्डशेषः ॥
शैलोद्भवा, स्त्री, (शैलात् उद्भवो यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥
शैल्यं, त्रि, (शिला+ष्यञ् ।) शिलासम्बन्धि । शिलाया इदं इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥
शैवं, क्ली, शैवालः । इति शब्दचन्द्रिका ॥ (शिवमधिकृत्य कृतो ग्रन्थः । शिव+अण् ।) शिवपुराणम् । यथा—
"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वे विष्णुपुराणम् ॥
(शिवस्येदमिति । शिव+अण् ।) शिवसम्बन्धिनि, त्रि (यथा । कथासरित्सागरे ।४०।८८।
"प्रापदायतनं शैवं नद्यास्तस्यास्तटस्थितम् ॥")
शैवः, पुं, (शिव+अण् ।) वसुकः । धुस्तूरः । इति राजनिर्घण्टः ॥ आचारविशेषः । यथा—
"अष्टाङ्गयोगसंयुक्तो यजेद्देवीं विधानतः ।
यावद्ध्यानं समाधिश्च तावत् शैवः प्रचक्षते ॥"
इत्याचारभेदतन्त्रम् ॥*॥
शिवोपासकः । तत्पर्य्यायः । श्रौर्द्ध्वस्रोतसिकः २ इति त्रिकाण्डशेषः । एतद्भेदा यथा—
"ततश्चकार भगवान् चातुर्व्वर्ण्यं हराश्रमे ।
शास्त्राणि चैषां मुख्यानि नानोक्तिविदितानि च ॥
आद्यं शैवं परिख्यातमन्यत् पाशुपतं मुने ! ।
तृतीयं कालवदनं चतुर्थञ्च कपालिनम् ॥
शैव आसीत् स्वयं शक्तिर्व्वशिष्ठस्य प्रियः सुतः ।
तस्य शिष्यो बभूवाथ गोपायन इति स्मृतः ॥
महापाशुपतस्त्वासीद्भारद्वाजस्तपोधनः ।
तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ॥
कालास्यो भगवानासीदापस्तम्बस्तपोधनः ।
तस्य शिष्यो वक्रो वैश्यो नाम्ना क्राथेश्वरो मुने ॥
महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान् ।
कुलोदर इति ख्यातो जात्या शूद्रो महातपाः ॥
एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च ।
कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः ॥"
इति वामने ६ अध्यायः ॥*॥
तस्य स्वरूपं यथा । आयान्तं शैवमालोक्याह ।
"श्रीमानसावेति जटालमौलि-
र्व्याघ्रत्वगालम्बितमध्यभागः ।
विभूतिसंभूषितभास्वदङ्गो
रुद्राक्षमालाकलितोर्द्धदेहः ॥"
इति विद्वन्मोदतरङ्गिण्यां २ तरङ्गः ॥
शैवलं, क्ली, (शेते इति । शी+"शीङो धुग्लग्वलञ् वालनः ।"उणा०४ । ३८ । इति वलञ् ।) पद्मकाष्ठम् । शैवाले, पुं, । इति मेदिनी ॥(यथा कुमारे । ५ । ९ ।
"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥"
विन्ध्यसमीपदक्षिणभागवर्त्तिगिरिविशेषः ।यथा, रामायणे । ७ । ८८ । १३ ।
"शैवलस्योत्तरे पार्श्वे ददर्श सुमहत् सरः ॥")
शैवलिनी, स्त्री, (शैवलमस्या अस्तीति । इनिः ।) नदी । इत्यमरः ॥
शैवालं, क्ली, (शी+बाहुलकात् वालञ् ।) जलजद्रव्यविशेषः । शेयाला इति भाषा । (यथा, महाभारते । ४ । ६० । १७ ।
"प्रावर्त्तयन्नदीं घोरां शोनितोदां तरङ्गिणीम् ।
केशशैवालसंवाधां युगान्ते कालनिर्म्मिताम् ॥")
तत्पर्य्यायः । जलनीली २ शैवलः ३ । इत्यमरः ॥ शेपालम् ४ शेवलम् ५ शीवलम् ६ शेपालः ७ जलनीलिका ८ । इति वाचस्पतिः ॥ जलनीलः ९ । इति मुकुटादयः । इति भरतः ॥ सैवालम् १० शेवालम् ११ वारिचामरः १२ शैवलम् १३ सलिलकुन्तलम् १४ हटपर्णी १५ अम्बुतालम् १६ । इति शब्दरत्नावली ॥ चरकः १७ जलकेशः १८ कावारम् १९ । इति हारावली ॥ जलजम् २० । अस्य गुणाः । शीतलत्वम् । स्निग्धत्वम् । सन्तापव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥
शैव्यः, पुं, श्रीकृष्णस्य घोटकविशेषः । यथा,—
"तुरगाः शैव्यसुग्रीवमेघपुष्पवलाहकाः ।"
इति त्रिकाण्डशेषः ॥
(यथा च महाभारते । १ । २२१ । ३ ।
"रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि ।
शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥")
पाण्डवसेनापतिविशेषः । यथा—
धृष्टकेतुश्चेकितानः काशीराजश्च वीर्य्यवान् ।
पुरुजित् कुन्तिभोजश्च शैव्यश्च नरपुङ्गवः ॥"
इति श्रीभगवद्गीतायाम् । १ । ५ ।
(स्त्री, प्रतीपस्य राज्ञः पत्नी । इति महाभारतम् । १ । ९५ । ४४ ॥ सगरस्य राज्ञः पत्नी । सा तु असमञ्जसो जननी । यथा, महाभारते । ३ । १०७ । ३९ ।
"असमञ्जा इति ख्यातः सगरस्य सुतोऽभवत् ।
यं शैव्या जनयामास पौराणां स हि दारकान् ।
गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्ब्बलान् ॥"
शिवसम्बन्धिनि, त्रि ॥
शैशवं, क्ली, शिशोर्भावः । (शिशु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् ।) बाल्यम् । इत्यमरः ॥ यथा,
"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"
इति रघुवंशे १ सर्गः ॥
शैशिरः, पुं, (शिशिरे ऋतौ भवः । शिशिर+अण् । श्यामचटकः । इति राजनिर्घण्टः ॥ शिशिरसम्बन्धिनि, त्रि, । यथा । श्रुतिः । तपस्तपस्यौ शैशिरावृतुः । इति तिथ्यादितत्त्वम् ॥
शैष्योपाध्यायिका, स्त्री, (शिष्योपाध्यायानांभावः कर्म्म वा । शिष्योपध्याय+"द्वन्द्वमनोज्ञादिभ्यश्च ।"५ । १ । १३३ । इति वुञ् ।) शिष्याध्यापना । इति सिद्धान्तकौमुदी ॥
शो, य निशाने । इति कविकल्पद्रुमः ॥(दिवा०-पर०-सक०-अनिट् ।) निशानमिहाल्पीकरणम् । य, श्यति शस्त्रं शूरः । इति दुर्गादासः ॥
शोकः, पुं, शुच+घञ् ।) चित्तविकलता । इष्टवियोगानुचिन्तनम् । इति नागोजीभट्टः ॥ बन्ध्वादिवियोगजनिता मनःपीड़ा । इति भावप्रकाशः ॥ तत्पर्य्यायः । मन्युः २ शुक् ३ । इत्यमरः ॥ शुचा ४ निशमः ५ । इति शब्दरत्नावली ॥ शोचनम् ६ खेदः ७ । इति हेमचन्द्रः ।
तन्निवारणहेतुर्यथा,—
"भरतं पतितं दीनं शोचन्तं सुभृशं तदा ।
शोचमानं वशिष्ठस्तु वारयामास हेतुभिः ॥
शोचमानस्तु सस्नेहा बान्धवाः सुहृदस्तथा ।
पातयन्ति गतं स्वर्गादश्रुपातेन राघव ॥
भूरिद्युम्नो गतः स्वर्गं पुण्येन पतितः पुनः ।
शोचितो बन्धुवर्गैश्च मृतस्नेहं परित्यज ॥"
इति वह्निपुराणम् ॥
अपि च । अथ शोकापनोदनम् । याज्ञवल्क्यः ॥
"कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थिताम् ।
स्नातानपनुदेयुस्तानितिहासैः पुरातनैः ॥
मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिवेदना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाकार्य्या विधानतः ॥"
इति शुद्धितत्त्वम् ॥